वर्षम् - ०१ अङ्कः - ०१ शोधज्योतिः
जनवरी-दिसम्बर, २०१९ ISSN-2350-0700

# कालविमर्शः

**सुनिताबेन के. ठक्कर***

कालशब्दं प्रत्येकं लब्धजन्मा स्वज्ञानावधि व्यारव्यातुं चेष्टते। सामान्यतः सर्वेः शास्त्रज्ञैः स्वस्वमतानुसारेण वुआख्यातः, व्युत्पादितः अयं शब्दः। तथा हि– कलयति = परिणमयति जातमात्रम् इति कालः। कवलयति जातमात्रं नियतिनियमानुसारेण इति वा कालः। उक्तं च विष्णुधर्मोत्तरे[१] -

**अनादिनिधनः काले रुद्रः सङ्कर्षणः स्मृतः।**
**कलनात् सर्वभूतानां स कालः परिकीर्तितः॥**
**कर्षणात् सर्वभूतानां स तु सङ्कर्षणः स्मृतः।**
**सर्वभूतशमित्वाच्च स रुद्रः परिकीर्तितः॥**

अपि च कूर्मपुराणे उक्तम्[२] -

**एको हि भगवानीशः कालः कविरिति स्मृतः।**
**ब्रह्मनारायणां।शानां त्रयाणां प्राकृतो लयः॥**
**प्रोच्यते कालयोगेन पुनरेव च सम्भवः।**
**परं ब्रह्म च भूतानि वासुदेवोऽपि शङ्करः॥**
**कालेनैव च सृज्यन्ते स एव ग्रसते पुनः।**
**तस्मात् कालात्मकं विश्वं स एव परमेश्वरः॥**

ज्यौतिषशास्त्रेऽपि उक्तम्[३] -

**भूतानामन्तकृत्कालः कालोऽन्यः कलनात्मकः।** इति।

---

* संस्कृतप्राध्यापिका

[१] माधवाचार्यकृतकालमाधवे उपोद्घातप्रकरणे २९ तमे पृष्ठे उद्धृतौ श्लोकौ।

[२] माधवाचार्यकृतकालमाधवे उपोद्घातप्रकरणे २९ तमे पृष्ठे उद्धृतौ श्लोकौ।

[३] तत्रैव।

कालविषये विविधेषु शास्त्रेषु विविधानि मतानि यथास्वसिद्धान्तं प्रतिपादितानि। तथा हि - श्राद्धकालाः प्रकीर्तिताः[४]। कृतं यत्स्वप्ने विचिनोति काले[५] अहमेव कालो नाहं कालस्य[६] का च सन्ध्या कश्च कालः[७] योगशास्त्रेऽपि संयमविशेषाद् धारणाध्यानसमाधित्रयरूपाद् योगिनः अतीतादिकाले प्रत्यक्षंतः पश्यन्ति इति अभिहितम्। तथा च पातञ्जलसूत्रम्- "**परिणामत्रयसंयमात् अतीतानागतज्ञानम्**" (पातञ्जलयोगसूत्रे ३.१३)

योगवासिष्ठे प्रसिद्धम् आभाणकम् अस्ति - "कपर्दकान्वेषणाय प्रवृत्तः चिन्तामणिमलभत" इति न्यायेन साधर्म्यवैधर्म्यज्ञानाय द्रव्याणि अन्विष्यन् परब्रह्मतत्त्वं प्राप्नोति। व्यवहारहेतुना भूतादिकालविशेषाणाम् आधारः स्वयं व्यवहारातीतो नित्यो निखयवः मुख्यः काले यः स परमात्मैव। तथा च श्वेताश्वतरोपनिषदि प्रतिपादितम् - काले काले गुणी सर्वविधः। पातञ्जलयोगदर्शने कालव्याख्या व्यासभाष्ये सुष्ठु प्रतिपादिता– "अतीत-अनागत स्वरूपतः अस्ति, अध्वभेदात् धर्माणाम्"[८] इति।

१. भविष्यद्व्यक्तिकम् = अनागतम्

२. अनुभूतव्यक्तिकम् = अतीतम्

३. स्वव्यापार– उपारूढम् = वर्तमानम्

व्याकरणमहाभाष्ये भगवता पतञ्जलिना अपि अस्य विवेचनं प्रकारान्तरेण कृतं यथा– "वर्तमाने लट्"[९] इति सूत्रविवरणप्रसङ्गेः आह भगवान् पतञ्जलिः-भूतभविष्यतोः प्रतिद्वन्द्वी वर्तमानः कालः। अत्र सूत्रे विवृण्वन् बालमनोरमायाम् आह श्रीवासुदेवदीक्षितः– धात्वर्थक्रियाया वर्तमानत्वम्= वर्तमानकालवृत्तित्वम्। कालविषये महत्त्वपूर्णः सन्दर्भः लभ्यते महाकविकालिदास– विरचिते शाकुन्तले[१०]- "ये द्वे कलं विधत्तः" अष्टमूर्तिशिवनिरूपणावसरे कविराह सूर्यायन्द्रमसौ इति द्वे शिवमूर्ती कालनियमनं कुरुतः। कालविषये महाकविर्भवभूतिरप्याह– "**कालोह्ययं निरवधिर्विपुला च पृथ्वी**"[११]

---

[४] सृष्टिप्रकरणे स्वस्मृतिग्रन्थे याज्ञवल्क्यः।

[५] बह्णृचाः।

[६] तैत्तिरीयकाः।

[७] सामगाः।

[८] पातञ्जलयोगसूत्रम्– ४.१२ तत्रत्यं भाष्यं च।

[९] वर्तमाने लट् (पा.सू.३.२. १२३)

[१०] अभिज्ञानशाकुन्तलम्– महाकविकालिदासविरचितम्– १.१. (नान्दीश्लोकः)

[११] मालतीमाधवम् (भवभूति विरचितम्), १.६

इति।

कालवाचकात् शब्दात् ठञ् प्रत्ययो भवति यथा दिन-दैनिक-सप्ताह-साप्ताहिक-पक्ष-पाक्षिक-मास-मासिक-वर्ष-वार्षिक-इत्यादीनि। अत्र विशिष्टतया केचन प्रयोगाः शिष्टैः कृताः उपलभ्यन्ते यथा-

**प्रातर्यशोक्तव्रतपारणान्ते प्रास्थानिकं स्वस्त्ययनं प्रयुज्य।**[१२]
**तौ दम्पती स्वां प्रति राजधानीं प्रस्थापयामास वशी वशीष्ठः॥**

अत्र प्रास्थानिकशब्दं निरुपयन् आचार्यमल्लिनाथः स्पष्टयाञ्चकार– प्रास्थानिकम् = प्रस्थानकाले भवम्, तत्कालेचितम् इत्यर्थः। कालोठ्ठञ् इति ठञ् प्रत्ययः। यथा कथंचिद् गुणवृत्त्यापि काले वर्तमानत्वात् प्रत्यय इष्यते इति वृत्तिकारः।

प्रोफेसर शिवराम महादेव परांजपे महोदयाः पुण्यपत्तनस्थाः कालः (काल इति महाराष्ट्रभाषायाम्) इति साप्ताहिकस्य संपादकाः आसन्। तैः प्रथमे अङ्के उपोद्धाते कालविषयकं निरुपणम् उदात्तशब्दैः कृतम् यथा-

“अयमेव कालः यः खड्गपाणिं सम्राजम् अशोकं पद्मपाणिरुपे परिणमन्तं ददर्श। अयमेव कालः यः गङ्गातटे युद्धं विहाय कृतसामतत्त्वयोः नृपयोः सामञ्जस्यं निरीक्षांचक्रे। अयमेव काल... इत्यादि। स्टिफन हॉकिंगनामकः आधुनिकः वैज्ञानिकः A Brief History of Time (Stephen Hawking)[१३] इति स्वपाण्डित्यपूर्णे आङ्ग्लग्रन्थे लिखति – Both Aristotle and Newton unambiguously measure the interval of time between two events, and that this time would be the same whosoever measured it, provided they used a good clock.”

उपरिनिर्दिष्ट-विविधोद्धारणानिवेशेन स्पष्टीभवति यत् कालः द्विविधः, विकारी, अविकारी च। अवस्थाः, वस्तूनि यः परिणमयति- विकारयुक्तानि करोति सः विकारी व्यवहारोपयोगी कालः। अपरः नित्यः अविनाशी निर्लिप्तः अविकारी कालः परमात्मनः स्वरूपभूतः अस्ति। शब्दान्तरैः कालनिर्देषः सावयवः कालः निरवयवः कालः इत्यपि क्रियते।

सर्वेऽपि प्राणिनः कालरूपे परमात्मानि निवसन्ति, अर्थात् तदाश्रयेण एव समाप्तिपर्यन्तं जीवनं यापयन्ति। वत्सरसंवत्सरशब्दयोः अयमेव अर्थः ज्यौतिषशास्त्रे प्रदत्तः -

**“वसन्ति प्राणिनः अस्मिन् इति वत्सरम्**

---

[१२] महाकविकालिदासविरचितरघुवंशे २.७० श्लोक

[१३] A Brief History of time by Stephen Hawking, p.18

**संवसन्ति प्राणिनः अस्मिन् इति संवत्सरम्**
**परिवसन्ति प्राणिनः अस्मिन् इति परिवत्सरम्"** इति।

श्रीमद्भागवते पञ्चमस्कन्धे खगोलनिरूपणावसरे अस्य विवेचनं कृतम्। व्यवहारसौकर्यार्थं सूक्ष्मातिसूक्ष्मः स्थूलातिस्थूलस्वरूपश्च कालः पुराणादिषु विवेचितः। व्रत-जयन्त्यादिप्रसङ्गे, जन्मवर्धापनदिन-प्रसङ्गे जीवनान्तिमदिनरूपणे, बाल्य-यौवन-जरादिषु अवस्थाभेदेषु अयमेव कालशब्दः प्रयुज्यते। मासैः, ऋतुभिः, अयनाभ्यां च सम्बद्धः अयं कालः। कालमाधवादिषु ग्रन्थेषु उत्सव-उपासनादि विषये विशिष्टकालस्य आवश्यकत्वात् तद्दृष्टया कालनिरूपणं कृतं वर्तते। देवगुरुणां बृहस्पतिना बृहस्पतिसंहितानामकः ग्रन्थः व्यरचि। तत्र कालविषये तात्त्विकं विवेचनं लभ्यते। ग्रहाणां महिमानं वर्णयन् भगवान् बृहस्पतिः न्यरुपयत् यत् समग्रः संसारः ग्रहाधीनः वर्तते। कालतत्त्वस्य बोधः अपि ग्रहाधीनः अस्ति। तथा हि-

**ग्रहाधीनं जगत्सर्वं ग्रहाधीना नरावराः।**[१४]
**कालज्ञानं ग्रहाधीनं ग्रहाः कर्मफलप्रदाः॥**

कालविषये अग्रे बृहस्पतिराह- काले स्वभावतः एव शुभता एवम् अशुभता निहिता भवति। कालः पूर्णरूपेण न शुभः न वा पूर्णरूपेण अशुभः भवति। एतादृशः अनादिः तथा अविनाशी कालः ग्रह-नक्षत्राणां योगेन शुभताम्, अशुभतां वा प्राप्नोति।

चिन्तनशीलाः मनीषिणः विवृण्वन्ति- स्थलकालस्य लयः प्रकृतौ भवति, यतः प्रकृतिः सकलस्थूलविषयस्य निदानम्, अर्थात् मूलकारणम् अस्ति। एषा प्रकृतिः परिवर्तमाना कालान्तरेण साम्यावस्थां याति सः प्रलयकालः। पुनः कालान्तरेण विकारं प्राप्नोति सः सृष्टिकालः। युग-वर्ष-मास दिनादिरुपः स्थूलः कालः प्रकृतेरेव प्रादुर्भवति। अयं कालः जडः, अनित्यश्च वर्तते। स्थूलकालस्य बोधः मनसा, इन्द्रियैश्च भवति। किन्तु सूक्ष्मकालं ग्रहीतुं नेन्द्रियाणि न वा मनः पारयति सर्वेषाम् अधिष्ठानभूतः परमात्मा महाकालः इति उच्यते। अनेन विवेचनेन स्पष्टं भवति यत् कालस्य मुख्याः त्रयो भेदाः प्रवर्तन्ते-

१. नित्यः महाकालः, अयं परमात्मरूपः।
२. प्रकृतिरूपः कालः, अयं प्रलयावद्यौ प्रकृतौ लीनस्वरूपः।
३. प्राकृतः कालः, अयं स्थूल व्यव्हारात्मकरूपः।

---

[१४] बृहस्पतिसंहिता, अ.१, श्लोक-६

म.म.गोपीनाथकविराजमतानुसारेण[१५] जगति द्वे विपरीतशक्ती कार्यरते स्तः। तयोः एका "भगवच्छक्तिः" अथवा "अनुग्रहशक्तिः" तथा द्वितीया "कालशक्तिः" अथवा "तिरोधानशक्तिः"। यदा परमेश्वरः आत्मसंकोचं कृत्वा जीवरूपेण स्वचैतन्यं प्रथयति, तदा एते द्वे पृथग्भवतः। एका जीवभावस्य, पशुभावस्य वा पोषणसाधनं भवति तथा अपरा अशुभभावं निवर्त्य परमस्वरूपे प्रत्यावर्तने सहायिका भवति। अनुग्रहशक्तिः क्रमशः जीवात्मानं परमात्मस्वरूपे प्रतिष्ठितं करोति। अपरत्र कालशक्तिः निरन्तरं बहिर्मुखगामिन्या प्रेरणया जीवात्मनं संसारपञ्जरे निबध्नाति। एषा काल-सङ्कर्षिणी शक्तिः इति उच्यते। कालतन्त्रे क्रमस्य अतीव महत्त्वमस्ति। निर्विशेषतया सर्वैः कालक्रमम् अवलम्ब्यैव स्वगतिः करणीया भवति। विश्वतन्त्रं कालाधीनम्। अतः विश्वं नित्यं परिवर्तनशीलमस्ति। कालेन सह देशज्ञानं नित्यं संश्लिष्टं भवति। अतः कालनिवृत्तौ जातायां देशनिवृत्तिरपि युगपत् भवति।

वस्तु-पदार्थ-व्यक्ति-घटना-विचार-भावाः एतेषु कालस्य गाढः प्रभावः दृश्यते। अस्माकम् अधीने केवलं "क्षणः" एव वर्तते। कालस्य परिवर्तनं कस्मिन् अधिष्ठाने भवति? यथा केन्द्रे वर्तमानं कमपि लक्ष्यबिन्दुम् आधारीकृत्यैव चक्रं परिपूर्णतां गच्छति। अस्मिन् विषये प्रश्नः उद्भवति। कालचक्रस्य केन्द्रबिन्दुः कालरूपः सन्नपि कालमतीत्य वर्तते, अतः सः कालस्य आश्रयः अस्ति। अयमेव भावः श्रीमदभगवद्गीतायां शब्दान्तरैः निरूपितः।[१६]

वयं कालज्ञानार्थं तर्कावलम्बनं कुर्मः किन्तु तर्कोऽपि कालज्ञानविषये निःशेषतया समर्थो न भवति, यतो हि कालः अपि कालातीतपरमात्मतत्त्वसत्तया परिवर्तनशीलः गतिमान् भवति। तं कालातीतं तत्त्वं परमात्मानम् अज्ञात्वा न शक्यं कालम् अवबोधितुम्। कालस्य स्वगतिर्नास्ति। कालातीतं तत्त्वं परमात्मनामकमेव कालचक्रं चोदयति।[१७]

अयं सारः - परमात्मा गतिप्रेरकः अस्ति। तेन प्रेरितः एव सूर्यः गतिशीलः भवति। सूर्यस्य गत्या कालमानं कर्तुं शक्यते - पूर्वाह्णः, मध्याह्नः सायम् इत्यादि। किन्तु अनन्तः अपरिणामः परमात्मा

---

[१५] कालविवेचना-ज्योतिषतत्त्वांकः, गीताप्रेस, गोरखपुर पृष्ठम्-११७

[१६] अजोऽपि सन्नव्यायात्मा भूतानामीश्वरोऽपि सन्।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया। गीता-४.६

[१७] न नरेणावरेण प्रोक्त एष सुविधेयो बहुधा चिन्त्यमानः।
अनन्यप्रोक्ते गतिस्तत्र नास्ति अणीयान् ह्यतकर्यमणु प्रमाणात्॥ कठोपनिषद् १.२.८

मानातीतः अस्ति, तस्य मानं कर्तुं न कोऽपि प्रभवति।[१८] जीवनव्यवहारः समग्रः कालतत्त्वेनैव भवति। “वार शब्दः” वासर शब्दस्य संकोचं गतं रूपमस्ति। अन्तरिक्षे ग्रहाणां स्थितिक्रमः अयमस्ति।

सूर्यः बुधः शुक्रः पृथ्वी - भौमः– गुरुः शनैश्चरः। सप्ताहवाराणाम् अयमेव क्रमः उपकारकः। सृष्टेः प्रारंभिकः दिवसः आसीत्- चैत्रशुक्लप्रतिपदा, रविवारस्य प्रातः समयः। सर्वे ग्रहाः मेषराशेः प्रारम्भिके भागे अश्विनीनक्षत्रे आसन्। सौरमण्डलस्य केन्द्रे सूर्यः अस्ति, अतः तस्य आद्या होरा भवति अर्थात् स आद्यहोरास्वामी अस्ति। अतः वाराणाम् आरम्भः सूर्यवारेण- रविवारे भवति। मासनामानि चन्द्रकारणात् भवन्ति, यथा- यस्यां पौर्णमास्यां चन्द्रः कृत्तिकानक्षत्रे भवति, सः सम्पूर्णः मासः कार्तिकमासः इति उच्यते। एवं कालस्य शास्त्रीयं मानं सुसूक्ष्मं भवति। तस्य निर्देशः अधः क्रियते।[१९]

| | |
|---|---|
| १ परमाणुः | कालस्य सूक्ष्मतमा अवस्था |
| २ परमाणू | १ अणुः |
| ३ अणवः | १ त्रसरेणु |
| ३ त्रसरेणवः | १ त्रुटिः |
| १० त्रुटयः | १ प्राणः |
| १० प्राणाः | १ वेधः |
| ३ वेधाः | १ लवः |
| ३ लवाः | १ निमेषः |
| १ निमेषः | १ पक्ष्मपातावधि |
| २ निमेषौ | १ विपलः |
| ३ निमेषाः | १ क्षणः |
| ५ निमेषाः | २ १/२ त्रुटयः |
| २ १/२ त्रुटयः | १ सेकण्डः (Second) |
| २० निमेषाः | १० विपलाः– ४ सेकण्डाः |
| ५ क्षणाः | १ काष्ठा |
| १५ काष्ठाः | १ दण्डः– १ लधुः |
| २ दण्डौ | १ मुहूर्तम् |

[१८] तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य।
विष्वमाभासि रोचनम्॥ ऋग्वेदसंहिता १.५०.४

[१९] सूर्यसिद्धान्तानुसारेण एतन्मानं निर्दिष्टम्।

| | |
|---|---|
| १५ लधवः | १ घटी– १ नाडी |
| १ घटी | २४ मिनिटाः (Minutes) |
| ३ मुहूर्तानि | १ प्रहरः |
| २ घट्यौ | १ मुहूर्तम्– ४८ मिनिटाः |
| १ प्रहराः | १ यामः |
| ६० घटयः | १ अहोरात्रः (दिनरात्रिचक्रम्) |
| ८ प्रहराः | १ अहोरात्रः |
| १५ अहोरात्राः | १ पक्षः |
| २ पक्षौ | १ मासः |
| २ मासौ | १ ऋतुः |
| ३ ऋतवः | ६ मासाः |
| ६ मासाः | १ अयनम् |
| २ अयने | १ वर्षम् |
| १ वर्षम् | १ संवत्सरम्– १ अब्दम् |
| १० अब्दानि | १ दशाब्दी |
| १०० अब्दानि | १ शताब्दी |

घटी, घडिकाः, घडी, नाडी, नाडीका, दण्डः एते समानार्थकाः शब्दाः।

| | |
|---|---|
| ६० तत्प्रतिविकलाः | १ प्रतिविकला |
| ६० प्रतिविकलाः | १ विकला |
| ६० विकलाः | १ कला |
| ६० कलाः | १ अंशः (Degree) |
| ३० अंशाः | १ राशिः |
| १२ राशयः | १ भगणः |

कालस्य स्थूलं परिमाणं युगमस्ति, तथा हि–

| | |
|---|---|
| १) सत्ययुगम् - ४००० मानववर्षाणि। | १७,२८,००० मानववर्षाणि। |
| २) त्रेतायुगम् - ३००० देवतावर्षाणि। | १२,९६,००० मानववर्षाणि। |
| ३) द्वापरयुगम् - २००० देवतावर्षाणि। | ८,६४,४०० मानववर्षाणि। |
| ४) कलियुगम् - १००० देवतावर्षाणि। | ४,३२,००० मानववर्षाणि। |

५) १ चतुर्युगी - १२,००० देवतावर्षाणि।	४३,२०,००० मानववर्षाणि।

व्यावहारिककालस्य विभाजनं षड्भावविकाररूपेण वार्ष्यायणिना आचार्येण कृतं, यास्काचार्येण निरूक्तस्य प्रथमाध्याये समुद्धृतम् अत्र सन्दर्भे प्रस्तूयते–जायते, अस्ति, वर्धते विपरिणमते, अपक्षीयते, विनश्यति इति। भर्तृहरिः आह– एते षड्भावविकाराः भावभेदानां योनिः अस्ति।

**अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः।**
**जन्मादयो विकाराः षड् भावभेदस्य योनयः॥** वाक्यपदीयम्-१.३

अग्रे निरूपयन् स आह-

१) क्रियाभेदाय कालस्तु ..................वा.प.३.९.८

२) कालो भेदाय कल्पते ...................वा.प्.३.९.२

कालस्य भेदाः त्रयः एव, ते सर्वमान्याः सन्ति।

अतीत- वर्तमान- अनागताश्च ते। शर्मण्यभाषायां तु आसन्नभूतात्, आसन्नभविष्यतश्च वर्तमानः अभिन्नः अस्ति इति निरूपितम् अस्ति। पाणिनिमुनेः अपि एतदेवमंत व्यक्तं भवति वर्तमानसामीप्ये वर्तमानंवद्वा। पा.स. ३.३. ।३।

वर्तमानः कालो नाम भूत भविष्यदः द्वयोः सीम्नोः स्पर्शः। अस्य कारणेन कालस्य निरन्तरता एव अस्ति। सारांशतया अन्ते निरूप्यते यत्" शक्तिरूपेण कालः एकः, अखण्डश्च।

## नक्षत्रविमर्शः

ज्यौतिषशास्त्रे पञ्चाङ्गरूपेण प्रसिद्धानि पञ्च अङ्गानि सन्ति- तिथिः, वारः, नक्षत्रम्, करणं, योगः इति। तेषु तृतीयम् अङ्गं नक्षत्रम् इति वर्तते। किं नाम नक्षत्रम्? इति प्रश्नस्य समाधानार्थं नक्षत्रशब्दस्य व्युत्पत्तिः यथाशास्त्रनिर्देशम् अत्र प्रस्तूयते। तथा हि–

१. न क्षतानि = न खण्डितानि इति नक्षत्राणि।

**अस्य समर्थनार्थं तैत्तरीयब्राह्मणश्रुतिः उद्ध्रियते**
**प्रबाहुर्वा अग्रे क्षत्राण्यातेषुः। तेषामिन्द्रः क्षत्राण्यादत्त।**
**न वा इमानि क्षत्राण्यभूवन्निति। तन्नक्षत्राणां नक्षत्रत्वम्।** तै.ब्रा.२.७.१८.३

२. नक्षन्ते = गतिं कुर्वन्ति इति– नक्षत्राणि। उक्तं च यास्काचार्येण निरुक्ते।

नक्षत्राणि नक्षत्रेर्गतिकर्मणः। अयं प्राचीनः भारतीय ज्यौतिषसिद्धान्तः अस्ति - मर्त्यलोके पुण्यं कुर्वाणाः पुण्यात्मानः देहत्यागात् अनन्तरं स्वर्गं प्रति नक्षत्ररूपेण गतिं कुर्वन्ति ते च तत्र देवरूपेण विराजन्ते। तथा हि देवगृहा वै नक्षत्राणि।

३. पृथिव्यां वर्तमानानां विविधानां पदार्थानां चित्राणि भवन्ति इति नक्षत्राणि। अर्थात् तेषां पदार्थानाम् आकृत्यनुसारेण नक्षत्राणां भवन्ति। तै.ब्रा.१.५.२

४. न क्षरन्ति = विनाशं गच्छन्ति इति नक्षत्राणि इति व्युत्पत्तिः सामान्यतया ज्यौतिषशास्त्रे रूढा अस्ति।

"नक्षत्र" शब्द व्युत्पत्तिरेव न, ब्राह्मणादिप्राचीनवैदिकसाहित्ये तस्य तस्य नक्षत्रस्य नाम्नः व्युत्पत्तिः अपि उदाहरणादिपुरस्सरं प्रदर्शिता दृश्यते। तथा हि प्रकारान्तरेण अपि नक्षत्रस्य पर्यायवाचकशब्दस्य "तारका" इति प्रसिद्धस्य व्युत्पत्तिः प्रदर्शिता तथा हि "सलिलं" वा इदम् अन्तरासीत्। यदतरन्त्। तत्तारकाणां तारकत्म्। "**अर्थात् सलिलमयात् अन्तरिक्षात् याः तारयन्ति ताः तारकाः**। तै.ब्रा.१.५.२ वास्तविकतया शिष्टसंस्कृते (Classical Sanskrit) "तारका" नाम अक्ष्णः कनीनिका। "तारिका" नाम या तारयति सा तारिका। एतेन स्पष्टं भवति यत् वेदे "तारका" नाम नक्षत्रम्, अयं आर्षः प्रयोगः।

ऋग्वेदसंहितायां तथा अथर्वसंहितायामपि "तारा" शब्दः नक्षत्र अर्थे प्रयुक्तः दृश्यते। क्रमशः १०.६८.११ तथा १३.२.१७ "द्योरवि स्मयमानो नभोभिः "इति ऋग्वेदमन्त्रे नभः शब्दोऽपि नक्षत्रवाचकः अस्ति। नक्षत्राणामेषामुपस्थे सोम आहितः इति ऋग्वेदे "नक्षत्र" शब्दस्य अर्थः चन्द्रस्य भ्रमणमार्गः।

केषांचित् नक्षत्राणां व्युत्पत्तयः उचितबोधाय प्रस्तूयन्ते-

५. पुनर्वसू– पुनः पुनः वस्तारौ, अर्थात् स्तोतॄणाम् आच्छादयितारौ भवतः तौ "पुनर्वसू"। तारकाद्वयं अस्मिन् नक्षत्रे वर्तते, अतः अयं शब्दः द्विवचनानाः इति प्रदर्शयितुं "पुनर्वसू" इति दीर्घान्तरूपं प्रस्तुतम्।

६. मघा- विचित्रधना भवति इति मधा। यास्काचार्येण निरूक्ते उक्तम्– मधमिति धननामधेयं, महतेर्दानकर्मणः। निरूक्तम् १.७

७. ऋग्वेदसंहितायां निरूपितं यत् सवितुः कन्या सूर्याख्या स्त्रीधनरूपेण सोमाय प्रदत्ता। ताः गावः प्रथमं मधानक्षत्रे एव अपवाहिताः। शतपथब्राह्मणग्रन्थे अपि अयमर्थः प्रदर्शितः, तथा हि– "मधासु" हन्यन्ते गावः। शतपथब्राह्मणम् २.१.२.११

८. रेवती– रेवती नाम धनवती। "रै" शब्दः धनवाची वेदेषु दृश्यते। राः (धनम्) अस्याः अस्ति इति रेवती। ऋक्संहितायाम् उक्तम्। "स्वस्ति पश्ये रेवती" ऋ.सं. ६.५१.१४।

९. रोहिणी:- अस्या नाम्नः व्युत्पत्तिविषये रोचिष्णुः कथा ऐतरेय ब्राह्मणे (१३.९) प्रदत्ता, तथा हि प्रजापतिः स्वां दुहितरम् अकामयत्। सा रोहिद्भूता (हरिणी रूपे परिणता)। प्रजापतिः अपि तां समीहमानः एणः (हरिणः) संबभूव। अथ पशुपतिः शिवः व्याधरूपं गृहीत्वा प्रजापतिं विदधम् अकार्षोत्। अतः प्रजापतिः मृगः उच्यते, पशुपतिः "मृगव्याधः" उच्यते तथा रोहिद्रूपे परिणतत्वात् प्रजापतिकन्या "रोहिणी" इति उच्यते। अयं भावः श्रीपुष्पदन्तविरचिते शिवमहिम्नस्तोत्रे अतिरमणीयतया प्रदर्शितः तथा हि प्रजानाथं नाथ प्रसभमभिकं स्वा दुहितरं

**प्रजानाथं प्रसभमभिकं स्वां दुहितरं**
**गतं रोहिण्द्भूतां रिरमयिषुमृष्यस्य वपुषा।**
**धनुष्पाणेर्या दिवमपि सपत्राकृतममुं**
**त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः॥** - शिवमहिम्नस्तोत्रम्, श्लोक-२२




तैत्तिरीयब्राह्मणे "रोहिणी" नक्षत्रसम्बन्धिनी कथा प्रकारान्तरेण प्रदर्शिता तथा हि- प्रजापतिः स्वां कन्या प्रति मुग्धः जातः। सा लज्जावशात् सर्वासु दिक्षु क्रमशः आत्मानं जुगोपियुः अधावत्। सर्वत्र पिता प्रजापतिः ताम् अन्वधावत्। अन्ते सा कन्या ऊर्ध्वम् आरुरोह। सा रोहिणी अभवत्। तद् रोहिण्याः रोहिणीत्वम्।

१) पुनर्वसूः- भद्रं भवेत् सर्वेषाम् इति कामनया देवताः अग्निम् आद्यातुम् ऐच्छन्, किन्तु तेषाम् अग्निः आधानरहितः एव अभवत्। अतः वसुः तस्मात् स्थानात् अपावर्तत। ते पुनर्वसुनक्षत्रे आधानम् अकार्षुः। तदा उत्तमः पूर्वोक्तमः वसुः उपावर्तत, अतः तन्नक्षत्रम् "पुनर्वसूः" इति उच्यते।

२) हस्तः पञ्चतारायुक्तं नक्षत्रमेतत् हस्ताकारमस्ति अतः हस्तः इति उच्यते।

मघा - चित्रा नक्षत्रं, मघा नक्षत्रं च सूर्यस्य योषितौ सतः इति ऋक्संहितायाम् (७.७५.५) निरूपितम्।

ऋक्संहितायाम् अन्येषामपि नक्षत्राणामुल्लेखः ऋक्षशब्देन काव्यात्मकतया, तत्त्वज्ञानात्मकतया च कृतः। यथा - अमी च ऋक्षा निहितास उच्चा नक्तन्ददृशे कुहचिदिदेवयुः अर्थात् एतानि यानि नक्षत्राणि रात्रौ उच्चैः स्थाने, प्रकाशन्ते तानि दिवसे कुत्रापि न दृश्यन्ते, न जाने कुत्र आत्मानं निह्नुवते? गोपथब्राह्मणे वर्णितं यत् स्वर्भानुः (राहुः) तमसा सूर्यं विद्धवान् तथा अत्रिऋषिः तम् अपनोदितवान्। ताण्डयमहाब्राह्मणे अपि ग्रहणस्य उल्लेखः लभ्यते (४.५.२) तैत्तिरीयब्राह्मणे निरूपितं यत् कृत्तिकादिषु कतिपयेषु नक्षत्रेषु अग्न्याधानं कर्तव्यम्। मृगनक्षत्राम् पूर्वस्यां दिशि आकाशगङ्गाम् अभितः व्दयोः तारकयोः पुञ्जः वर्तते। पाश्चात्यज्यौतिषिका आहुः तयो एकः canis major (बृहल्लुब्धकः) तथा अन्य canis minor (लघुलुब्धकः) इति उच्यते। द्वौ श्वानौ इति नाम्ना अपि तौ प्रसिद्धौ। पाश्चात्यविदुशामनुसारेण पुनर्वसुपुष्यनक्षत्रयोः समीपे आलोक्मानः तारकापुञ्जः Navis (नौः नौका) हिरण्मयी आकाशनौका इति उच्यते। हस्तनक्षत्रस्य पञ्च तारकाः सन्ति। तासाम् आकारः हस्ताकारः दृश्यते, अतः तस्य "हस्तः" इति संज्ञा अजनिष्ट। तैत्तरीयब्राह्मणे नक्षप्रजापतिवर्णनं वर्तते, यथा हस्तनक्षत्रं प्रजापतेः हस्तः, चित्रा शिरः, निष्टया हृदयम् विशाखायाः तारकाद्वयं तस्य द्वे जङ्घे इत्यादि। (वामनपुराण- नक्षत्रपुरुषं आकृतिः)

ज्यौतिषशास्त्रस्य प्रारम्भे अपि भारतीयानां विदुषां मनसि नक्षत्रज्ञानं पूर्णमासीत्। ते अजानन् यत् सम्पातबिन्दुः भरणीनक्षत्रस्यम् चतुर्थं चरणम् आसीत्। अत एव वौदिक काले नक्षत्रगणाना कृत्तिकानक्षत्रतः भवति स्म। प्रश्नव्याकरणाङ्गे नक्षत्रफल विवरणं विशिष्टतया कृतम्। नक्षत्रफलं त्रिषु भागेषु तस्मिन् ग्रन्थे विभक्तम्, यथा–

| **कुलनक्षत्राणि** | **उपकुलनक्षत्राणि** | **कुलोपकुलनक्षत्राणि** |
|---|---|---|
| धनिष्ठा | श्रवणम् | |
| उत्तराभाद्रपदा | पूर्वाभाद्रपदा | अभिजित् |
| अश्विनी | रेवती | शतभिषा |
| कृत्तिका | भरवी | आर्द्रा |
| मृगशिरः | रोहिणी | अनुराधा |
| पुष्यम | पुनर्वसू | |
| मधा आश्लेषा | | |
| उत्तराफाल्गुनी | पूर्वाफाल्गुनी | |
| चित्रा | हस्तः | |

| | |
|---|---|
| विशाखा | स्वातिः |
| मूलम् | ज्येष्ठा |
| उत्तराषाढा | पुर्वाषाढा |

द्वाररूपेणं अपि नक्षत्राणां विभजनं प्राचीनग्रन्थेषु उपलभ्यते।

| **पूर्वद्वारम्** | **दक्षिणद्वारम्** | **पश्चिमद्वारम्** | **उत्तरद्वारम्** |
|---|---|---|---|
| कृतिका | मधा | अनुराधा | धनिष्ठा |
| रोहिणी | पूर्वाफाल्गुनी | ज्येष्ठा | शतभिषा |
| मृगशिरः | उत्तराफाल्गुनी | मूलम् | पूर्वाभाद्रपदा |
| आर्द्रा | हस्तः | पुर्वाषाढा | उत्तराभाद्रपदा |
| पुनर्वसू | चित्रा | उत्तराषाढा | रेवती |
| पुष्यम् | स्वातिः | अभिजित् | अश्विनी |
| आश्लेषा | विशाखा | श्रवणम् | |

प्रत्येकं नक्षत्रस्य देवता वर्तते, तद् अधःकोष्ठे प्रदर्श्यते

| अङ्क | नक्षत्रम् | देवता | नक्षत्रम् | देवता |
|---|---|---|---|---|
| १ | कृतिका | अग्निः | स्त्री. | बहवः |
| २ | रोहिणी | प्रजापतिः | स्त्री. | एका |
| ३ | १,३,४ मृगशीर्ष<br>२ इन्वका | सोमः<br>सोमः | नपुंसक<br>स्त्री. | एका<br>बहवः |
| ४ | १,३,४ आर्द्रा<br>२ बाहु | रुद्रः<br>रुद्रः | स्त्री.<br>पु. | एका<br>द्वे |
| ५ | पुनर्वसु | अदितिः | पु. | एका |
| ६ | तिष्य | बृहस्पतिः | पु. | एका |
| ७ | आश्लेषा | सर्पः | स्त्री. | बहवः |
| ८ | मधा | पितृ. | स्त्री. | बहवः |
| ९ | १,३,४ फल्गुनी<br>२ पूर्वफल्गुनी | अर्यमा<br>अर्यमा | स्त्री.<br>स्त्री. | द्वे<br>द्वे |
| १० | १,३,४,<br>२ उत्तरफल्गुनी | भग<br>भग | स्त्री.<br>स्त्री. | द्वे<br>द्वे |
| ११ | हस्त | सविता | पु. | एका |
| १२ | चित्रा | १, २ इन्द्र | स्त्री. | एका |

| | | | | |
|---|---|---|---|---|
| | | ३, ४ त्वष्टा | | |
| १३ | १ स्वाती | वायुः | स्त्री. | एका |
| १४ | २,३,४ निष्टचा | इन्द्राणी | स्त्री. | द्वे |
| १५ | अनुराधा | मित्रः | स्त्री. | बहवः |
| १६ | १, रोहिणी ३ ४ ज्येष्ठा | इन्द्रः | स्त्री. | एका |
| १७ | १ विचृतौ | पितरः | पु. | द्वे |
| | २ मूलबर्हणी | निर्ऋतिः | स्त्री. | एका |
| | ३ मूलम् | निर्ऋतिः | नपु. | एका |
| | ४ मूलम् | प्रजापतिः | नपु. | एका |
| १८ | १,३,४ आषाढा | आपः | स्त्री. | बहवः |
| | १ पूर्वाषाढा | आपः | स्त्री. | बहवः |
| १९ | १,३,४ आषाढा<br>२ उत्तराषाढा<br>३, ४ अभिजित | विश्वेदेवाः<br>विश्वेदेवाः<br>ब्रह्म | स्त्री.<br>स्त्री.<br>नपु. | बहवः<br>बहवः<br>एका |
| २० | श्रविष्ठा | वसुः | स्त्री. | एका |
| २१ | श्रविष्ठा | वसुः | स्त्री. | बहवः |
| २२ | शतभिषक् | १, २ इन्द्रः<br>३, ४ वरुण | पु.<br>पु. | एका<br>एका |
| २३ | १,३,४ प्रोष्ठपद<br>२ पूर्व प्रोष्ठपद | अजएकपादं<br>अजएकपादं | पु.<br>पु. | बहवः<br>बहवः |
| २४ | १,३,४ प्रोष्ठपद<br>२ उत्तर प्रोष्ठपद | अहिर्बुध्नय<br>अहिर्बुध्नय | पु.<br>पु. | बहवः<br>बहवः |
| २५ | रेवती | पूषा | स्त्री. | एका |
| २६ | अश्वयुज | अश्विन | स्त्री. | द्वे |
| २७ | अपभरणी | यमः | स्त्री. | बहवः |

वामनपुराणे नक्षत्राणां नक्षत्रपुरुषरूपेण विवरणं समुपलभ्यते तथा हि - वामनपुराणे अशीतिमे अध्याये नारदपुलस्त्य-ऋषिसंवादे पुलस्त्यऋषिमुखेन नक्षत्रपुरुषस्य अद्‌भुतं विवरणं वर्तते, यथा–

| **क्रमः** | **नक्षत्रम्** | **नक्षत्रपुरुषाङ्गम्** | **क्रमः** | **नक्षत्रम्** | **नक्षत्रपुरुषाङ्गम्** |
|---|---|---|---|---|---|
| १ | मूलम् | चरणौ | १५ | हस्तः | हस्तौ |
| २ | रोहिणी | जङ्घे | १६ | पुनर्वसू | अङ्गुलयः |
| ३ | अश्विनी | जानुनी | १७ | आश्लेषा | नरवाः |

| | | | | | |
|---|---|---|---|---|---|
| ४ | पूर्वाषाढा | ऊरुव्दयम् | १८ | ज्येष्ठा | ग्रीवा |
| ५ | उत्तराषाढा | | १९ | श्रवणम् | कर्णौ |
| ६ | पूर्वाफाल्गुनी | गृह्यप्रदेशः | २० | पुष्यम् | मुखम् |
| ७ | उत्तराफाल्गुनी | | २१ | स्वातिः | दन्ताः |
| ८ | कृत्तिका | कटिः | २२ | शतभिषा | हनुद्वयम् |
| ९ | पूर्वाभाद्रपदा | पार्श्वद्ववयम् | २३ | मधा | नासिका |
| १० | उत्तराभाद्रपदा | | २४ | मृगशीर्षम् | नेत्रद्वयम् |
| ११ | रेवती | कुक्षिद्वयम् | २५ | चित्रा | ललाटम् |
| १२ | अनुराधा | हृदयम् | २६ | भरणी | शिरः |
| १३ | धनिष्ठ | पृष्ठदेशः | २७ | आर्द्रा | केशाः |
| १४ | विक्षरवा | भुजद्वयम् | | | |

नक्षत्रपुरुषस्य आराधनविषये विस्तरशः विवरणम् अस्मिन् प्रकरणे कृतम्, जिज्ञासुभिः तत् तत्रैव द्रष्टव्यम्। नक्षत्रविषये कराक्षररूपेण विवरणं बृहत्संहितायां तथा मुहूर्तचिन्तामणेः पीयूषधाराटीकाया लभ्यते। व्याकरणसम्प्रदाये यः प्रकृतिविभाग - प्रत्ययविभागयोः विषये आगनन् प्रक्रिया विषये प्रश्ने कृते केवलम् आकाशे पश्यन् स्मरणस्य नाट्यं रचयति सः वैयाकरणखसूचिः (a stuffless grammarian) इति उच्यते। एवं कुत्सितः वैद्यः भिषक्पाशः इति उच्यते, एतादृशः मीमांसकः मीमोसकदुर्दसढः इति उच्यते। एवं ज्यौतिषिकः अपि नक्षत्रसूचिः इति उच्यते। तस्य विषये सांक्षिप्त टिप्पणी अधो लिख्यते–

**अविदित्वैव यः शास्त्रं दैवज्ञत्वं प्रपद्यते।**
**स पङ्क्दिकदूषकः पापो ज्ञेयो नक्षत्रं सूचकः॥** (बृ.सं.२.१७)
**तिश्युत्पत्तिं न जानन्ति ग्रहाणां नैव साधनम्।**
**परवाक्येन वर्तन्ते ते वै नक्षत्रसूचकाः॥** (मुहूर्तचिन्तामणौ पीयूषधारा टीका)

## नक्षत्रम्

“दशदिनकृतपापं हन्ति सिद्धान्तवेत्ता त्रिदिनजनितदोषं तन्त्रविज्ञः स एव। करणभगवणवेत्त हन्त्यहोरात्रदोषं जनयति धनमंहश्चात्र नक्षत्रसूची॥ (पीयूषधारां टीका)

“गृहे गृहे गत्वा अपृष्ट एव नक्षत्राणि अखिनी-आदीनि, शुभ-अशुभ- मलसूचकानि सूचयति इति नक्षत्रसूची। (पीयूषधारां टीका)

व्याकरणशास्त्रे महर्षिपाणिनिना अपि ज्यौतिषविषयकाणि नौकानि सूत्राणि प्रयुक्तानि। तेषु सूत्रेषु नक्षत्रविषयकाणि अपि कतिचित् सूत्राणि वर्तन्ते, यथा–

१) फल्गुनीप्रोष्ठपदानां च नक्षत्रे (१.२.६०) पा. सू.
२) लिङ्-चोर्ध्वमौहूर्तिके (३.३.१६४) पा. सू.
३) रेवत्यादिभ्यष्ठक् (४.१.१४६) पा. सू.
४) नक्षत्रेण युक्तः कालः (४.२.३) पा. सू.
५) बिभाषा फाल्गुनी (४.२.२२) पा. सू.
६) श्रावण्या... वसन्तादिभ्यष्ठक् (४.२.६२) पा. सू.

अपरं च सर्वेषां भारतीयमासानां नामानि नक्षत्रम् आधारीकृत्य निर्मितानि। नक्षत्रेण युक्तः कालः साऽस्मिन्पौर्णमासी इत्यादि पाणिनि सूत्रैः तानि नामानि व्युत्पादितानि। तथा हि–

| **मासनाम** | **पौर्णमास्यां विद्यमानं नक्षत्रम् (प्रायः)** |
|---|---|
| १) कार्तिकः | कृतिका |
| २) मार्गशीर्षः | मृगशीर्षक |
| ३) पौषः | पुष्यम् |
| ४) माघः | मधा |
| ५) फाल्गुनः | उत्तराफाल्गुनी |
| ६) चैत्रः | चित्रा |
| ७) वैशाखः | विशाखा |
| ८) ज्येष्ठः | ज्येष्ठा |
| ९) आषाढः | उत्तराषाढा |
| १०) श्रावणः | श्रवणम् |
| ११) भाद्रपदः | उत्तराभाद्रपदा |
| १२) आश्विनः | अश्विनी |

एतेन नक्षत्राणां जीवने कियन्मूल्यमस्ति इति स्पष्टतया दृश्यते। अथर्ववेदे नक्षत्रविषयकाः त्रयो मन्त्राः अवधेयाः सन्ति, यथा -

चित्राणि साकं दिवि रोचनानि सरीसृपाणि भुवने जवानि। तुर्मिशं सुमतिमिच्छमानो अहानि गीर्भिः सपर्यामि नाकम्॥ (अथर्ववेदः १९.७.१)। अस्य सारांशः - सौरमण्डले अनेकानि गुणान्वितानि नक्षत्राणि सन्ति। प्रतिदिनम् अहं सुमतिं प्राप्तिकाः तानि अर्चयानि, तेन सुखं लभेऽहम्। यानि नक्षत्राणि

दिव्यन्तरिक्षे अप्सु भूमौ यानि नगेषु दिक्षु। प्रकल्पर्यंचन्द्रमा यान्वेन्ति सर्वाणिममैतानि शिवानिं सन्तु॥ अस्य सारांशः यानि यानि नक्षत्राणि चन्द्रमाः समर्थानि कुर्वन् प्रयाति तानि तानि नक्षत्राणि जले, भूमौ, अन्तरिक्षे वाचरतो मम शुभं कुर्वन्तु।

**अष्टाविंशानि शिवानि शग्मानि सहयोगं भजन्तु मे ।**
**योगं प्रपद्ये क्षेमं च क्षेमं प्रपद्ये योगं च नमोऽहोरात्राभ्यामस्तु॥**[२०]

अस्य सारांशः अष्टाविंशतिः नक्षत्राणि मम कल्याणकारकं, सुखकारकं च सर्वं प्रयच्छन्तु। मयि सामर्थ्यम् एतु, अहं मम रक्षाविद्यौ सपर्थो भवेयम्। अहोरात्राभ्यां मे नमः अस्तु। नक्षत्र– ग्रहयोः भेदः - आकाशीय तेजः पुञ्जेषु नक्षत्र-ग्रहयोः उभयोः समावेशः अस्ति।

**नक्षत्रव्याख्याः -** तेजः पुञ्जा नु वीक्ष्यन्ते गगने रजनीषु ये।
नक्षत्रसंज्ञकाकास्ते तु न क्षरन्तीति निश्चलाः॥

**ग्रहव्याख्या -** विपुलाकारवन्तोऽन्ये गतिमन्तो ग्रहाः किल।
स्वगत्य भानि गृह्णन्ति यतोऽतस्ते ग्रहाभिधाः॥ -बृहत्पाराशरहोराशास्त्रम्

## सन्दर्भग्रन्थाः


१. मुहूर्तचिन्तामणिः पीयूषधाराटीकासहितः
२. बृहत्संहिता
३. बृहत्पाराशरहोराशास्त्रम्
४. वामनपुराणम्
५. पाणिनीया अष्टाध्यायी
६. भारतीयज्योतिषम् - नेमिचन्द्रशास्त्री
७. भारतीय ज्यौतिषम् - शंकरबालकृष्णदीक्षितः, झारखंडी-अनुवादसहितम्
८. निरुक्तम् - यास्काचार्याः
९. वैयाकरणसिद्धान्तकौमुदी, भट्टोजिदीक्षितः


[२०] अथर्ववेदः १९.८.२